# Shivaproktam Suropadeshah

# શિવપ્રોક્તં સુરોપદેશઃ

## Document Information

Text title : Shivaproktam Suropadeshah

File name : suropadeshaHshivaproktaM.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 50 - suropadeshaH | 5-55||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# શિવપ્રોક્તં સુરોપદેશઃ

મન્માયામોહિતા યૂયમભિજાતાસ્સ્થ સત્તમાઃ ।
ભવન્તઃ પશવસ્સર્વે ચાબ્રહ્મસ્તમ્ભપૂર્વકાઃ ॥ ૫॥

અહં માયામયૈઃ પાશૈરીષણાભિસ્સુરાસુરાન્ ।
વધ્વા ક્રીડામિ દેવ્યા ચ જગત્યસ્મિંશ્ચરાચરે ॥ ૬॥

અહમેવ સુરાન્ત્સર્વાન્મોચકો ભક્તિભાવિતઃ ।
મમ રૂપમવિજ્ઞાય ભવન્તો વિગ્રહં મમ ॥ ૭॥

દૃષ્ટ્વૈવ ચેષ્ટાં વિવિધાં ગુણભૂતાં ગુણાતિગાઃ ।
વિષયેષ્વનુરક્તં માં જ્ઞાત્વા મોહં પરં ગતાઃ ॥ ૮॥

તદદ્યૈવાપનેષ્યામિ શૃણુધ્વં પરમં મમ ।
ગોપ્યાદ્ગોપ્યતરં જ્ઞાનમથર્વશિરસિ સ્થિતમ્ ॥ ૯॥

સર્વશ્રુતિશિરોદ્ભૂતં સાક્ષાદજ્ઞાનનાશનમ્ ।
અહમેકો નિરાધારો વર્તામ્યાકાશવત્સદા ॥ ૧૦॥

નૈવ લેપોઽસ્તિ મનસો મમ કાર્યેન્દ્રિયૈસ્સદા ।
ન મહાભૂતસઙ્ઘૈશ્ચ ન કાલેન દિશા સુરાઃ ॥ ૧૧॥

વસ્તુતો હ્યપરિછિન્નોહ્યસઙ્ગોઽસ્મિનિરામયઃ ।
અવ્યક્તઃ પરમાત્માહં સર્વેષામન્તરાસ્થિતઃ ॥ ૧૨॥

અહમાદિશ્ચ મધ્યઞ્ચાપ્યહમન્તસ્સનાતનઃ ।
જગજ્જન્માદિનાશોત્થઙ્ક્રિયાભિર્નાહમીશ્વરઃ ॥ ૧૩॥

મત્ત એવાખિલં વિશ્વં મય્યેવેદં સ્થિતં સુરાઃ ।
બ્રહ્મવિષ્ણવીશ્વરેદ્રેન્દ્રા ભવન્તો મત્ત એવ હિ ॥ ૧૪॥

નિર્ગતાસ્સ્થ ભવન્તો વૈ જગજ્જાલમિદં સુરાઃ ।
સોમોઽહં જનિતા દેવાસ્સર્વેષાં ભવતાં સુરાઃ ॥ ૧૫॥

ભવદ્ભિસ્સહ મય્યેવ વિદ્યતે તચ્ચરાચરમ્ ।
ન મત્તોઽસ્તિ પૃથક્કિઞ્ચિન્નેહ નાનાસ્તિ કિઞ્ચન ॥ ૧૬॥

માં વિજ્ઞાયેદમખિલં જાનન્ત્યેકં સનાતનમ્ ।
મમૈકત્વપરિજ્ઞાનાત્કો મોહોઽત્ર નિલિમ્પકાઃ ॥ ૧૭॥

માં વિદિત્વૈવ પરમા શાન્તિસ્તેષાં સદૈવ હિ ।
ગ્રન્થિભિર્નાભિભૂયન્તે કામ્યકર્મમયૈસ્સુરાઃ ॥ ૧૮॥

વધ્યન્તેઽત્ર ભવન્તો હિ વિવશા (પશવઃ) મમ માયયા ।
વાક્યૈર્ગુણમયૈર્દેવાસ્તત્ફલં પ્રાપ્યતે દિવિ ॥ ૧૯॥

યે યથા માં પ્રપદ્યન્તે નાનોપાસનયા સુરાઃ ।
તાંસ્તથૈવાહમેવાદ્ય તદ્ભાવાનાં પ્રપૂરકઃ ॥ ૨૦॥

તથૈવ પ્રેરયામ્યદ્ય સોઽહઙ્કારપરો ભવેત્ ।
માં પ્રેરકમવિજ્ઞાય કર્તાહમિતિ મન્યતે ॥ ૨૧॥

સર્વેન્દ્રિયગુણાભાસં સર્વેન્દ્રિયવિવર્જિતમ્ ।
સર્વસ્ય પ્રભુમીશાનં સર્વસ્ય શરણં સુરાઃ ॥ ૨૨॥

(સર્વસ્ય પ્રભુમીશાનં સુરસ્સર્વસ્યકારણમ્) ॥ ૨૨॥

અપાણિપાદોઽજવનઃ પશ્યામ્યહમતન્દ્રિતઃ ।
અચક્ષુશ્શ્રોત્રહીનોઽસ્મિ મનઃપ્રાણાતિગોઽસ્મ્યહમ્ ॥ ૨૩॥

મયાવાસ્યમિદં સર્વં માં વિજ્ઞાય વિમુચ્યતે ।
અહં સર્વશરીરેષુ વિજાનામીદમેવહિ ॥ ૨૪॥

ન વેત્તિ માં સુરાઃ કોઽપિ યોગયુક્તોઽપિ કશ્ચન (મુક્તયે) ।
સર્વાશ્રયોઽહં હિ સદા સર્વાધારશ્ચ સત્તમઃ ॥ ૨૫॥

પઞ્ચકોશવિહીનશ્ચ પઞ્ચભૂતાતિગોઽસ્મ્યહમ્ ।
પઞ્ચપ્રાણાતિગશ્ચાહં ક્વેદં દેહેન્દ્રિયં સુરાઃ ॥ ૨૬॥

અપક્ષપાતસહિતસ્સર્વભૂતેષુ સર્વદા ।
લોકોત્થસુખદુઃખશ્ચ ષડૂર્મિભિરપિ દ્રુતમ્ ॥ ૨૭॥

નૈવ લિપ્તોઽસ્મિ દેહેષુ હ્યશીર્ષ્ણોહમવસ્થિતઃ ।
સૂર્યો યથા સર્વલોકં પ્રવર્તયતિ કર્મભિઃ ॥ ૨૮॥

લોકકાર્યવિહીનશ્ચ તદ્વત્સાક્ષિરહં સ્થિતઃ ।
કાયપ્રાણમનોધર્મૈર્નાનાહઙ્કારસમ્ભવૈઃ ॥ ૨૯॥

ધર્મૈર્વા પાપજાલૈર્વા નૈવ લેપોઽસ્તિ મે સુરાઃ ।
કાષ્ટાહં પરમશ્ચાહં ભાસકોઽહં જડેષ્વપિ ॥ ૩૦॥

ભીપાસ્માદનિલો વાતિ ભીષોદેતિ ગભસ્તિમાન્ ।
ભીષૈવ ચન્દ્રયમકા ભીષૈવેદં સ્થિતઞ્જગત્ ॥ ૩૧॥

જ્યોતિષાં જ્યોતિરસ્મીહ બિમ્બાબિમ્બાતિગોઽસ્મ્યહમ્ ।
એકત્વં વા તથા દ્વિત્વં બહુત્વં વા ન કિઞ્ચન ॥ ૩૨॥

નૈવ મુક્તિર્નૈવ બન્ધો મયિ સર્વેશ્વરે સુરાઃ ।
સર્વભૂમાત્વહં દેવાસ્સાક્ષ્યસાક્ષિવિવર્જિતઃ ॥ ૩૩॥

ન ચાણુર્ન મહાંશ્ચાપિ નિર્ગુણસ્સગુણોઽપિ વા ।
ન માયા માયિ વા કિઞ્ચિન્નૈવાહમપિ ચેશ્વરઃ ॥ ૩૪॥

એષોઽહં પરમાનન્દો રસોઽહં સર્વવસ્તુગઃ ।
એપ બ્રહ્માદિસ્સર્વશ્ચાપ્યહમેવ સદા સુરાઃ ॥ ૩૫॥

યૂયમાદિસ્સર્વ એવ સીમા ભૂમાહમેવ હિ ।
ન વેદવાદવેદાન્તૈર્ન ગુરૂક્ત્યા ન ચેચ્છયા ॥ ૩૬॥

(ન વેદવાદવેદાન્તૈર્ન ગુરૂક્ત્યા નચેજ્યય) ॥ ૩૬॥

ન કર્મણા વા તપસા પ્રાપ્નોત્યેકોઽપિ વા સુરાઃ ।
મત્પ્રસાદેનૈવ દેવા વૃણુતમ્ભક્તમેવ હિ ॥ ૩૭॥

મન્નિષ્ઠાં સર્વભાવેન કશ્ચિજ્જાનાતિ વા ન વા ।
અથાન્યથા નયત્યર્થં વેદાન્તાનાં દુરાત્મવાન્ ॥ ૩૮॥

મામવિજ્ઞાય દુઃખૌઘાન્નૈવ મુક્તો ભવિષ્યતિ ।
વિભૂતિં મમ વક્ષ્યામિ શ ૃણ્વન્તુ પરમાં સુરાઃ ॥ ૩૯॥

યલ્લાભાન્નાપરો લાભો મત્પ્રસાદેન લભ્યતે ।
યે ભસ્મનિષ્ટાસ્સતતં તેષામેવ પ્રકાશયેત્ ॥ ૪૦॥

યે ત્રિપુણ્ડ્રલસદ્ભાલાસ્તેપામેતત્પ્રકાશ્યતે ।
યે રુદ્રાક્ષમહાદેહાસ્તેષામેતત્પ્રકાશ્યતે ॥ ૪૧॥

યે રુદ્રાધ્યાયનિરતાસ્તેષામેતત્પ્રકાશ્યતે ।
યે મલ્લિઙ્ગારાધનેછાસ્તેષામેતત્પ્રકાશ્યતે ॥ ૪૨॥

(યે મલ્લિઙ્ગારાધનેછાબિલ્વપત્રાદિસાધનૈ) ॥ ૪૨॥

યે પઞ્ચાક્ષરસન્મન્ત્રજપધ્યાનૈકમાનસાઃ ।
તેષાં શ્રુતિશિરોદ્ભૂતં જ્ઞાનં વિપ્રેષુ જાયતે ॥ ૪૩॥

યે શિવક્ષેત્રનિરતાસ્તેષામેતત્પ્રકાશ્યતે ।
અનન્યભાવાસ્સતતં વેદાન્તે મયિ યે ગુરૌ ॥ ૪૪॥

અનન્યભાવા યે દેવાસ્સદા કૌટિલ્યવર્જિતાઃ ।
મન્નામનિરતા યે વૈ તેષામેતત્પ્રકાશ્યતે ॥ ૪૫॥

સર્વેભ્યો દેવસઙ્ઘેભ્યો વરિષ્ઠં મન્વતે હિ યે ।
મધ્યાનનિરતા યે વૈ તેષામેતત્પ્રકાશ્યતે ॥ ૪૬॥

મધ્યાનં વેદવેદાન્તસારતાત્પર્યચિન્તનમ્ ।
તેષ્વશક્તેષુ મદ્રૂપચિન્તનં તત્પ્રબુધ્યતે ॥ ૪૭॥

ચિન્તયેન્નીલકણ્ઠં માં ત્રિણેત્રં ચન્દ્રશેખરમ્ ।
ઉમાર્ધવિગ્રહં રૂપં સ્વહૃત્પદ્મસ્ય સદ્મગમ્ ॥ ૪૮॥

ભાવયન્ત્સતતં યુક્તસ્તજ્જ્ઞાનં પ્રાપ્નુયાત્સુરાઃ ।
અપરોક્ષં હિ મે જ્ઞાનં તસ્ય જાયેત નિશ્ચિતમ્ ॥ ૪૯॥

એવં સાધનહીનાનાં જ્ઞાનં તદ્દુર્લભં સુરાઃ ।
શ◌ૃણ્વન્ ગુરુમુખૈર્ભાવૈર્બુદ્ધ્યા શબ્દાર્થવેદનૈઃ ॥ ૫૦॥

તન્નૈવ તત્પ્રાપ્નુયાજ્જ્ઞાનં કોટિકલ્પશતૈરપિ ।
મત્પ્રસાદવિહીનો યો ગૃહી વાથ યતિર્વની ॥ ૫૧॥

તન્નૈવ પ્રાપ્નુયાજ્જ્ઞાનં સાક્ષાત્સંસારમોચકમ્ ॥ ૫૨॥

યસ્મિન્ ગ્રામે પુરે વા સતતપરિચિતાપારશૈવપ્રચારા
રુદ્રાધ્યાયજપાદરાસ્સિતલમદ્ભસ્મત્રિપુણ્ડ્રાદરાઃ ।
શમ્ભોર્લિઙ્ગસમર્ચકાસ્તુ સુતરાં તે નાતુરં નૈવ તે
સમ્પ્રાપ્યન્તિ યમાદ્ભયં જનિજરારોગપ્રણાશેન વા ॥ ૫૩॥

જ્ઞાનમેતદતિદુર્લભં સુરા ભુક્તિમુક્તિજનકં મમ ભક્ત્યા ।
યુક્તિયુક્તગુરુસૂક્તિસુધાબ્ધૌ રુદ્ધમાદ્યમનઘં સતતઞ્ચ ॥ ૫૪॥

લભ્યતે કિલ પચેલિમપુણ્યૈઃ કસ્યચિન્મમકૃપાવશતો હિ ।
બન્ધહૃદ્ધૃદયભેદકં સુરાહ્યન્યથાસ્ય ન પથા ન કર્મણા ॥ ૫૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે શિવપ્રોક્તં સુરોપદેશઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૫૦ - સુરોપદેશઃ । ૫-૫૫॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 50 - suropadeshaH . 5-55..

Notes:
Śiva શિવ delivers Upadeśa to Deva-s સુરોપદેશ whereby He outlines the methods and merits of worshipping Him.

Encoded and proofread by Ruma Dewan

---

*Shivaproktam Suropadeshah*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*